॥ॐ॥

# ॥ हनुमान ध्यानम् ॥

श्री आञ्जनेय स्वामी परदेवताभ्यो नमः
ध्यानम्
उद्यदादित्य संकाशं उदार भुज विक्रमम् ।
कन्दर्प कोटि लावण्यं सर्व विद्या विशारदम् ॥

श्री राम हृदयानंदं भक्त कल्प महीरुहम् ।
अभयं वरदं दोर्भ्यां कलये मारुतात्मजम् ॥

अञ्जनानन्दनं वीरं जानकी शोकनाशनम् ।
कपीशं अक्षहन्तारं वन्दे लंका भयंकरम् ॥

SriKubereshwarDham.com

आञ्जनेयं अतिपाटलाननं कञ्जनाद्रि कमनीय विग्रहम् ।
पारिजात तरुमूल वासिनं भावयामि पवमान नन्दनम् ॥

उल्लंघ्य सिन्धोः सलिलं सलीलं यश्शोक वह्निं जनकात्मजाय ।
आदाय तेनैव ददाह लंकां नमामि तं प्रान्जलिराञ्जनेयम् ॥

अतुलित बलधामं हेम शैलाभदेहम्
दनुजवन कृशानं ज्ञानिनां अग्रगण्यम् ।
सकल गुण निधानं वानराणां अधीशम्
रघुपति प्रिय भक्तं वात जातं नमामि ॥

॥ॐ॥

गोश्पदीकृत वारशिं मशकीकृत राक्षसाम् ।
रामायण महामाला रत्नं वन्दे अनिलात्मजम् ॥

यत्र यत्र रघुनाथ कीर्तनं तत्र तत्र कृत मस्तकाञ्जलिम् ।
वाष्पवारि परिपूर्ण लोचनं मारुतिं राक्षसान्तकम् ॥

अमिषीकृत मार्तंदं गोश्पदीकृत सागरम् ।
तृणीकृत दशग्रीवं आञ्जनेयं नमाम्यहम् ॥

मनोजवं मारुत तुल्य वेगं
जितेन्द्रियं बुद्धिमतां वरिष्ठम् ।
वातात्मजं वानर यूथ मुख्यं
श्री रामदूतं शरणं प्रपद्ये ॥

SriKubereshwarDham.com

## || हनुमान गायत्री मंत्र ||

ॐ आञ्जनेयाय विद्महे वायुपुत्राय धीमहि ।
तन्नो हनुमत् प्रचोदयात् ॥

ॐ रामदूताय विद्मिहे कपिराजाय धीमहि ।
तन्नो: मारुति: प्रचोदयात ॥

ॐ अन्जनिसुताय विद्मिहे महाबलाय धीमहि।
तन्नो: मारुति: प्रचोदयात ॥

srikubereshwardham.com

# || हनुमान त्रिकाल वंदना ||

## प्रातः वंदना

प्रातः स्मरामि हनुमन् अनन्त-वीर्यं
श्री राम-चन्द्र चरणाम्बुज चंचरीकम् ।
लंकापुरी-दहन नन्दित-देववृन्दं
सर्वार्थ-सिद्धि-सदनं प्रथित-प्रभावम् ॥

## मध्याह्न वंदना

SriKubereshwarDham.com

माध्यम् नमामि वृजिनार्णव तारणैका-धारं
शरण्य मुदिता-नुपम प्रभावम् ।
सीताधि सिंधु परि-शोषण कर्म दक्षं
वंदारु कल्प-तरुं अव्ययं आञ्जनेयम् ॥

## सायं वंदना

सायं भजामि शरणोप स्मृता-खिलार्ति
पुञ्ज प्रणाशन विधौ प्रथित प्रतापम् ।
अक्षां-तकं सकल राक्षस वंश
धूम केतुं प्रमोदित विदेह सुतं दयालुम् ॥